[1]छृण्णम्[A]-छृण्णः-छृण्णवान्, छर्दितः, चिच्छर्दिषितः-चिच्छृत्सितः,
[चरीच्छृदितः-तवान्;

छृदः, छर्दः, चिच्छर्दिषुः-चिच्छृत्सुः, चरीच्छृदः;

छर्दितव्यम्, छर्दयितव्यम्, चिच्छर्दिषितव्यम्-चिच्छृत्सितव्यम्,
[चरीच्छृदितव्यम्;

छर्दनीयम्, छर्दनीयम्, चिच्छर्दिषणीयम्-चिच्छृत्सनीयम्, चरीच्छृदनीयम्;

[2]छृद्यम्, छर्द्यम्, चिच्छर्दिष्यम्-चिच्छृत्स्यम्, चरीच्छृद्यम्;

ईषच्छर्दः-दुश्छर्दः-सुच्छर्दः; — —

छृद्यमानः, छर्द्यमानः, चिच्छर्दिष्यमाणः-चिच्छृत्स्यमानः, चरीच्छृद्यमानः;

छर्दः, छर्दः, चिच्छर्दिषः-चिच्छृत्सः, चरीच्छृदः;

छर्दितुम्, छर्दयितुम्, चिच्छर्दिषितुम्-चिच्छृत्सितुम्, चरीच्छृदितुम्;

छृत्तिः, [3]प्रच्छर्दिका, छर्दना, चिच्छर्दिषा-चिच्छृत्सा, चरीच्छृदा;

छर्दनम्, छर्दनम्, चिच्छर्दिषणम्-चिच्छृत्सनम्, चरीच्छृदनम्;

[4]छर्दित्वा-छृत्त्वा, छर्दयित्वा, चिच्छर्दिषित्वा-चिच्छृत्सित्वा, चरीच्छृदित्वा;

प्रच्छृद्य, प्रच्छर्द्य, प्रचिच्छर्दिष्य-प्रचिच्छृत्स्य, प्रचरीच्छृद्य;

छर्दम् २, } छर्दम् २, } चिच्छर्दिषम् २-चिच्छृत्सम् २, }
छर्दित्वा २-छृत्त्वा २, } छर्दयित्वा २, } चिच्छर्दिषित्वा २-चिच्छृत्सित्वा २, }

---

1. 'सेऽसिचि—' (7-2-57) इति सादेरार्धधातुकस्येड्विकल्पनेन, 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पनेन वा, 'यस्य विभाषा' (7-2-15) इति निष्ठाया इण्णिषेधः। निष्ठातकार-धातुदकारयोः 'रदाभ्याम्—' (8-2-42) इति नत्वम्। 'ऋवर्णान्नस्य णत्वं वाच्यम्' (वा. 8-4-1) इति धातुनकारस्य णत्वम्। 'ष्टुना ष्टुः' (8-4-41) इति निष्ठानकारस्य ष्टुत्वेन णकारः।

2. 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इति क्यप्।

3. 'रोगाख्यायां ण्वुल् बहुलम्' (3-3-108) इति ण्वुलि, 'प्रत्ययस्थात्—' (7-3-44) इतीत्त्वे रूपम्। **प्रच्छर्दिका**=वमथुः रोगविशेषः।

4. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः। इट्पक्षे, 'न क्त्वा सेट्' (1-2-18) इति कित्त्वनिषेधात् गुणः। इडभावपक्षे धातुदकारस्य 'खरि च' (8-4-55) इति चर्त्वेन तकारः।

A. '**संच्छृण्ण**गात्रमथ शालवतर्दिनस्ते
चाणूरमुष्टिकमुखा वसनान्यकृन्तन्।' धा. का. 3. 2.